संस्कृतवार्ता:

दिनाङ्क :- 27/03/2025 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

आदौ मुख्यवार्ताः

- केन्द्रीयगृहमन्त्री अमितशाहः अद्य उक्तवान् यत् हुर्रियत-सङ्घटनेन सह सम्बद्धौ द्वौ अन्यौ समूहौ पृथक्तावादं परित्यक्तौ।
- प्रशासनम् राइड-हेलिङ्ग-सेवा 'सहकार' टैक्सी इति भाटकयानं प्रचालयिष्यति।
- केन्द्रीयमन्त्री अश्विनी-वैष्णवः अवदत् यत् भारतं विश्वस्य द्वितीयं बृहत्तमं 5G इति आपणं सञ्जातम्।
- भारतं वैश्विक-चायोद्यमे महत्त्वपूर्णं कीर्तिमानं सोपानं प्राप्नोत्, श्रीलङ्काम् अतिक्रम्य चतुर्विंशत्यधिक-द्विसहस्रतमे वर्षे विश्वस्य द्वितीयं बृहत्तमं चाय-निर्यातकं जातम्।
- अस्य वर्षस्य खेलोइण्डिया-पैरागेम्स् इति प्रतिस्पर्धा अद्य सायङ्काले नवदिल्ल्यां भव्य-समापन-समारोहेन समाप्यते।

----------------------------------

शः हुर्रियत

केन्द्रीयगृहमन्त्री अमितशाहः अद्य उक्तवान् यत् हुर्रियत-सङ्घटनेन सह सम्बद्धौ द्वौ अन्यौ समूहौ पृथक्तावादं परित्यक्तौ। सः अवदत् यत् जम्मू-कश्मीरस्य पृथक्तावादि-समूहौ तहरीकी इस्तेकलालः, तहरीक-ए-इस्तीकामतः च प्रधानमन्त्रिणा नरेन्द्रमोदिना निर्मित-नूतन-भारतं प्रति विश्वासं प्रकटितवन्तौ। गृहमन्त्री सामाजिक-सञ्चार-पटले एतत् घोषणां कृतवान् यत् पृथक्तावादः अन्तिमावस्थायाम् अस्ति, एकतायाः विजयः च सम्पूर्णे कश्मीरे प्रतिध्वन्यते इति।

----------------------------------

अमित शाह

केन्द्रीय-गृह-सहकारिता-मन्त्री अमितशाहः अघोषयत् यत् प्रशासनम् उबर-ओला-इत्युभयोः अनन्तरं सहकारि-संस्थाभिः सञ्चालिता राइड-हेलिङ्ग-सेवा 'सहकार' टैक्सी इति भाटकयानं प्रचालयिष्यति। लोकसभायां चर्चासमये श्रीशाहः उक्तवान् यत् एषः उपक्रमः 'सहकारेण समृद्धिः' इत्यस्य अनुरूपम् अस्ति। अपि च कतिपयेषु मासेषु बृहद्-सहकारि-टैक्सी इति सेवायाः आरम्भः भविष्यति, यस्मिन् द्विचक्रिका-वाहनानां, भाटक-यानानां, त्रिचक्रिकानां, चतुर्चक्रिका-वाहनानां च पञ्जीकरणं सम्भवं भविष्यति तथा च लाभः साक्षात् चालकाय भविष्यति इति।

श्रीशाहः अवदत् यत् "सहकार से समृद्धि" इति न केवलं घोषवाक्यम् अस्ति। अपि च सहकारिता-मन्त्रालयः गतसार्धत्रय-वर्षेषु तत् साधयितुं अहर्निशं श्रमम् अकरोत् इति।

-----------------------------------

<u>अश्विनी वैष्णव</u>

केन्द्रीयमन्त्री अश्विनी-वैष्णवः अवदत् यत् अद्य भारतं विश्वस्य द्वितीयं बृहत्तमं 5G इति विपणिं सञ्जातम्। अद्य नवदिल्ल्याम् एकं कार्यक्रमं सम्बोधयन् श्रीवैष्णवः अवदत् यत् विभिन्नेषु क्षेत्रेषु प्रायः एकादश-लक्षकोटि-रूप्यकाणां निवेशः अभवत्।

श्रीवैष्णवः उक्तवान् यत् गतदश-वर्षेषु देशे चिकित्सकीय-महाविद्यालयानां, भारतीय-प्रौद्योगिकी-संस्थानानां च सङ्ख्या द्विगुणिता जाता। सः अवदत् यत् सम्पूर्ण-दक्षिणीय-समृद्धदेशाः भारतस्य यू.पी.आई. इति देयव्यवस्थां स्वीकर्तुं रुचिं प्रदर्शयन्ति।

-----------------------------------

<u>चायोद्यम</u>

भारतं वैश्विक-चायोद्यमे महत्त्वपूर्णं कीर्तिमानं सोपानं प्राप्नोत्, श्रीलङ्काम् अतिक्रम्य चतुर्विंशत्यधिक-द्विसहस्रतमे वर्षे विश्वस्य द्वितीयं बृहत्तमं चाय-निर्यातकं जातम्। टी-बोर्ड्-आफ्-इण्डिया इत्यनेन सङ्कलितस्य दत्तांशस्य अनुसारं, देशे गतवर्षे प्रभावपूर्णं पञ्च-पञ्चाशदधिक-द्विशत-दशलक्षं किलोग्राम-मितचायस्य निर्यातः अभवत्, येन तस्य निर्याताङ्केषु पर्याप्तवृद्धिः

अभवत्। केन्या-देशः शीर्षस्थानं धारयति। भारतस्य चाय-निर्यातः गतदशसु वर्षेषु औन्नत्यम् अवाप्नोत्, यत् भू-राजनैतिक-चिन्तायाः कारणेन वैश्विक-विपणि-अनिश्चितेषु सत्सु अपि महत्त्वपूर्णं साफल्यम् अवाप्नोत्।

----------------------------------

<u>जगदीप धनखडः</u>

राज्यसभायाः सभापतिः जगदीप-धनखडः केन्द्रीयगृहमन्त्रिणः अमितशाहस्य विरुद्धं काङ्ग्रेस्-दलस्य विशेषाधिकार-प्रस्तावं निराकृतवान्। श्रीशाहस्य वक्तव्यमालक्ष्य काङ्ग्रेस-दलस्य सांसदः जयराम-रमेशः सदने प्रस्तावोऽयं उपस्थापितवान्। श्रीशाहः स्वीये वक्तव्ये अवदत् यत् यदा काङ्ग्रेस-दलं शासने आसीत् तदा प्रधानमन्त्री-राष्ट्रियापत्साहाय्य-कोषस्य नियन्त्रणं एकेन परिवारेण कृतमासीत्। प्रस्तावं निराकृत्य सभापतिः अवदत् यत् सः तं प्रस्तावं समवधानतया पठितवान्, यत्र विशेषाधिकारः भङ्गः नासीत् इति।

असौ अवदत् यत् सदनं जनानां प्रतिष्ठां विनाशयितुं मञ्चं न भविष्यति इति। सभापतिः सदस्यानाम् आचरणार्थं नूतनाः दिङ्निर्देशाः निर्मातुम् आचारसमित्यै आदिष्टवान्।

----------------------------------

<u>राज्यसभा - मत्स्यपालकाः</u>

प्रायः सप्तनवतिः यावत् भारतीय-मत्स्यजीविनः श्रीलङ्कादेशस्य निग्रहे सन्ति। त्र्यशीतिः यावत् मत्स्यजीविनः दण्डं यापयन्ति, त्रयः कार्याचरणस्य प्रतीक्षां कुर्वन्ति, अन्ये एकादशजनाः निगडिताः च। श्रीलङ्कादेशे कारावासे निवसन्तः भारतीय-मत्स्यजीविनां विषये प्रश्नकालावधौ अद्य राज्यसभायां पूरकप्रश्नानाम् उत्तरं ददन् विदेशमन्त्रिणा डॉ. जयशङ्करेण एतत् उक्तम्। सः अवदत् यत् तस्य प्रशासनेन एषा समस्या उत्तराधिकारे प्राप्ता अस्ति तथा च एतत् प्रकरणम् चतुःसप्तत्यधिक-ऊनविंशतितमे वर्षे आरब्धम्, यदा तत्कालीन-केन्द्रप्रशासनेन राज्यप्रशासनेन सह परामर्शं कृत्वा अन्ताराष्ट्रीय-सागरीय-सीमारेखा स्थापिता। सः अवदत् यत्, षड्सप्तत्यधिक-ऊनविंशतितमे वर्षे यत्र मत्स्यपालनक्षेत्रं परिभाषितम् आसीत् तत्र पत्रविनिमयः अभवत्। सः

अवदत् यत्, चतुःसप्तत्यधिक-ऊनविंशतिः, षड्सप्तत्यधिक-ऊनविंशतितमे वर्षे गृहीतः निर्णयः एव प्रशासनस्य सम्मुखीभूतायाः परिस्थितेः मूलकारणानि सन्ति। डॉ. जयशङ्करः अवदत् यत्, प्रधानमन्त्री मत्स्यसम्पदा-योजनायाः अन्तर्गतम् अनवधानेन पारगमनं न्यूनीकर्तुं नौकाः ट्रांसपोण्डर्-इति यन्त्राणि नियोजयितुं प्रशासनं प्रयतते।

---------------------------------

<u>जम्मू-कश्मीर्</u>

जम्मू-कश्मीरे एशिया-महाद्वीपस्य दीर्घतमायाः ज़ोजिला-सुरङ्गायाः प्रायः सप्तति-प्रतिशतं कार्यं पूर्णम् अभवत्। श्रीनगर-लद्दाखयोः मध्ये प्रत्येकस्मिन् ऋतौ सम्पर्कं प्रदातुम्, एतस्याः परियोजनायाः निर्माणार्थं पञ्चशताधिक-पञ्चसहस्र-कोटिरूप्यकाधिक-व्ययः जातः। ज़ोजिला-सुरङ्गा-परियोजनायां त्रयोदश-किलोमीटर-मिताधिकस्य सुरङ्गमार्गस्य निर्माणम्, सुरङ्गमार्गं यावत् सप्तदश-किलोमीटर-मिताधिकानां प्रवेशमार्गाणां निर्माणं च सम्मिलितम्, यस्य दीर्घता आहत्य त्रिंशत्-किलोमीटर-मिताधिकम् अस्ति।

---------------------------------

<u>खेलो इण्डिया</u>

पञ्चविंशत्यधिक-द्विसहस्रतमस्य वर्षस्य खेलोइण्डिया-पैरागेम्स् इति प्रतिस्पर्धा अद्य सायङ्काले भव्यसमापन-समारोहेण समाप्तं भविष्यति। भारत-क्रीडा-प्राधिकरणेन आयोजितेस्मिन् समारोहे युवकार्याणां तथा क्रीडाराज्यमन्त्री रक्षा निखिल खड्से भागं भजिष्यति। स्पर्धायाः अन्तिमे दिने पैराटेबलटेनिस् इत्यस्याः क्रीडायाः निर्णायकद्वन्द्वे क्रीडकाः उत्तमं प्रदर्शनं कृतवन्तः। पुरुषवर्गस्य षष्ठं वर्गे येजदी अस्पी भामगरा स्वर्णपदकम्, विकास-ठाकुरः रजतपदकम् च विजितवान्। महिलानां षष्ठवर्गस्य स्पर्धायां भाविका कुकडिया स्वर्णपदकम्, जमानी नूरजहां नूराली रजतपदकं च प्राप्तवती।

।। इति वार्ता:।।